CC-0. Digitized by eGangotri and MIDF- Delhi



॥ श्रीः ॥

अन्तर्नादः

कविता संग्रह

लेखक : पं. श्यामलाल घिमिरे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ श्रीः ॥

अन्तर्नादः

कवितासंग्रहः

लेखकः- पं. श्यामलाल घिमिरे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशकः-

आनन्दप्रसाद घिमिरे
धरान - १४, विजयपुर

प्रकाशन मितिः २०५६, अनन्त चतुर्दशी

प्रथमं संस्करणम् ५०० प्रति

मूल्यम्

मुद्रक : विजयपुर पब्लिकेशन्स (प्रा.)लि. (अफसेट प्रेस)
धरान-४, ☎ २१४०४/२५७८१

कम्प्यूटर सेटिङ्ः-
मैया वराल
रेस कम्प्यूटर
धरान - ४
सुनसरी

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीः

प्रकाशकीयम्

श्रद्धेयाः पाठकाः,

इदमिदानीं पूज्यपादैः तातमहोदयैः पं. श्रीश्यामलाल घिमिरे 'शास्त्री' महाभागैः वेदाचार्यैः विनिर्मितं अन्तर्नादकाव्यसंग्रहं अत्र प्रकाश्यते।

प्राणिनः प्रकृतेः आश्रयं अभिलषन्ति। सुदुर्लभं आध्यात्मिकं ज्ञानं च प्रकृतेः आश्रयादेव लभ्यते। मातृभूमिः स्वर्गादपि गरीयसी भवति। अस्मिन् संसारे सर्वे प्राणिनः सुखमभिलषन्ति। ग्रामे स्थितानि शाकानि पुष्प-फलानि च मधुराणि निरापदानि च भवन्ति। योगिनश्च रहसि वने परमात्मानं ध्यायन्ति।

लिखूप्रदेशे सुरम्याणि स्थलानि बहुत्र दृश्यन्ते। तत्र लेती पोकलीग्राम सन्निकटे (तारुके) नामकं स्थानमस्ति। तत्रस्थितस्य श्री तारकेश्वर महादेवस्य स्तुतिः कृता वर्ततेऽत्र (श्यामसोती) स्थानस्य च विवरणमस्ति तत्र वर्णनं पद्यकाव्यात्मकं छन्दोवद्धं च प्रायः। नैपाल्यां संस्कृते च समानरूपेण काव्यधाराः प्रवाहिताः वर्तन्ते।

अत्र भवन्तः पूज्यपादाः वि.सं. २०३१ संवत्सरात्-वि.सं. २०५० पर्यन्तं श्रीनेपाल वेद विद्याश्रमे (संस्कृत माध्यामिक विद्यालयः) प्रधानाध्यापकपदे आसन्। भवद्भिः तस्मिन्वसरे आश्रमस्य वार्षिकोत्सवे च स्तुतिपद्यादीनि विनिर्मिता। मकवानपुरस्थित पुण्यक्षेत्रादि विविध स्थलयात्रा र्णन पुरः सरं 'शास्त्री' महोदयैः जन्मस्थानीयाः वंशावलिश्च प्रस्तुता विद्यते।

एषा कृतिः मनोहरा अस्ति वा नास्ति पाठकाः एव विवेचयेयुः परं ेती (पोकली) पचली स्थानीयाः प्रकृतेः मनोहारिणी शोभा अवश्यमेव वलोकनीया, लिखू कौशिक्याः, पोकली निर्झरिण्याश्च प्रवाहं सन्नादं च वश्यमेव दर्शनीयम्, श्रवणीयञ्चेति प्रतिभाति अनेन काव्यदर्शनेन।

अस्य काव्यसंग्रहस्य प्रकाशने मदीय प्रथमप्रवृत्या दृष्टिदोषेण, ुद्रणादि, दोषेण वा विन्दुमात्राक्षरादिषु काश्चन त्रुटयो भवेयुस्तर्हि अस्मत् ाठकवरान् विशेषतोऽभ्यर्थं करोमि बालककल्पं मां क्षन्तुम्। अत्र च ुद्रणादिकार्ये ये जनाः संलग्ना सन्ति तानहं साधुवादं स्मरन् अत्र विरमामि।

विनयावनत
आनन्दप्रसाद घिमिरे

ान १४, विजयपुर
नसरी, कोशी
न्त चतुर्दशी, २०५६

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

“मित्रस्य चक्षुषा समीक्षामहे”

श्रद्धेयाः पाठकाः,

अधुना संसारे भौतिकवादः सर्वत्र व्याप्तः । आध्यात्मिकवादस्य समुन्नत्यै च वयं संल्लग्ना भवेम । अस्माकं प्राचीनानां ग्रन्थानां अध्ययनं अन्वेषणं च सर्वैः कर्तव्यम् । अस्माभिः आवश्यकतानुसन्धानदिशि च सुदृष्टिः दातव्या ।

‘भयादस्याग्निस्तपति भयात्तपतिसूर्यः । भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः” (कठोपनिषद्)। परमात्मनः भयात् इन्द्रयम अग्निवायुसूर्याः देवाः स्वं स्वं कार्यं कुर्वन्ति । किमधिकं ? वृक्षाः परोपकाराय फलन्ति, पत्रपुष्पफलानां आत्मीयानां धारणमात्रेणैव संबध्यन्ते, गन्धरसरूपस्पर्शोपभोगैर्नसंबध्यन्ते । तथैव नद्यश्च उपभोगैः न संबध्यन्ते । इदं शरीरं परोपकारार्थमस्ति ।

अत्र जन्मस्थलादिवर्णनं स्वानुभवं च प्रस्तूयते । ज्ञानदृष्टिदोषार्थं मुद्रणादिदोषार्थञ्च विनिवेदयामि मां क्षन्तुम् । अन्ते च श्री पशुपतिचरणावृन्दयोः समर्पयन् आशासे यत् पाठकवराः एतत् काव्यसंग्रहपठनेन न्यूनाधिक्यं ज्ञानं समवाप्नुयुरिति शम् ।

ॐ विश्वानि देवसवितर्दुरितानि परासुव । यद्भद्रं तन्न आसुव ॥ ॐ

वडा नं. ७,घ २-७७, विनीतः

सिफल, काठमाण्डौं । **लेखकः**

अनन्त चतुर्दशी, २०५६ पं. श्यामलाल घिमिरे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विषय सूची:-

(क) संस्कृत खण्ड:

शीर्षक	पृष्ठ
१. श्यामलक्ष्य-"ॐ नमः शिवाय"	१
२. चिन्तारमा वनस्थली	५
३. तारकेश्वर महादेवं........ॐ नमः शिवायं	८
४. श्री गलेश्वरब्रह्मचारी.........	११
५. गोरक्षा मांगलीयात्रा..........	१२
६. ने.वे.वि. जयन्ती द्वितीयवर्षे	१३
७. ने.वे.वि. तृतीय वर्षे	१३
८. सुरक्ष्या हिन्दुसंस्कृतिः	१४
९. ने.वे. विद्याश्रम जयन्ती चतुर्थ वर्षे	१५
१०. पञ्चमे वार्षिकोत्सवे	१६
११. पष्ठ वर्षे प्रविष्टा	१८
१२. सप्तमे वार्षिकोत्सवे	१९
१३. अष्टमे वार्षिकोत्सवे	२०
१४. नवमे वार्षिकोत्सवे	२२
१५. स्वकीय वंश वर्णनम्	२५

(ख) नेपाली खण्ड:

१. मंगलाचरण	२८
२. जन्मस्थलवर्णन	३०
३. फर्कौं गाऊँ गाऊँ भज्दै रमाउँ	३५
४.गाउँका विशेषताहरू	३८
५. यात्री	४१
६. पाहि नमस्ते सीने	४२
७. अन्तर्नाद	४४
८. नववर्षको शुभकामना	४६
९. गोरक्षकालीको यात्रा दर्शन	४८
१०. गोकर्णको भ्रमण	५०
११. पुण्यक्षेत्र	५१
१२. आश्रम	५८
१३. योग्य शिष्य बनौं यहाँ	५९
१४. धन्यराजा निजै चुनौं	६०
१५. फुटकर कविताहरू	६१

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ॐ नमः शिवाय

(लीनं खनाल्लिखूक्ता हि पचली त्रिझरी झरी)

प्रथमोच्छ्वासः

गंगातीर सुशोभिते रमणके श्यामाभिधे विस्तृते
तीर्थे यत्र चतुर्षु दिक्षु शिखरेष्वम्वु प्रवाहीतटे ।
रम्ये पक्षि निनादिते त्रिसमये झिल्लीरिगुङ्गुञ्जिते
ज्ञानार्थं जनपुञ्ज सेवितशिवं भक्त्या स्मरामि सदा ॥१॥

स्मशानेश्वर सेवकाः प्रतिपलं वेतालभूतादिकाः
सिंह क्रोडमृगादिकाश्च प्रमथा रक्षन्ति तल्लक्षणम् ।
पुर्भिच्छैपुकठिन्पुभृङ्गभृगुँभिराकाशदृष्ट्यन्तगम्
इष्टार्थं जनपुञ्ज सेवित शिवं भक्त्या नमामि सदा ॥२॥

नाना स्वादुफलानि माधुरवनानीन्दूपमं शीतलम्
लोलद्वन्यलतां निकुञ्जविनदं संगीत वेदध्वनिम् ।
जेतुमैन्द्रपुरं सुयज्ञवितति श्रीरस्ति स्वर्गाश्रमे
धन्यं जन्म हिमाञ्चले त्रिसमये भक्त्या भजामि सदा ॥३॥

माया कल्पित कामधेनु कपिला गोपाल वृद्धिप्रदा
वत्सस्तन्यमलं पयोधरधरा धारास्तनेभ्यश्चिरम् ।
कस्मै पाययति किं विचार्य मनसि शंकाकुलो गोपकः
गोश्छायोपमयान्वयात्तदनु वै दृष्टेश्वरं शंकरम् ॥४॥

ग्राम्यो मूढमतिर्वराकपरशुमुद्यम्य स्थाणौ भृशम्
ब्रूहि त्वं मम दैनिकं पिबसि गोर्दुग्धंश्च्युतं तस्करः ।
व्याहृत्येति भृशं जघान कुमतिर्भग्नातनूर्लोहितम्
नामानुस्मरणाय सर्वजनता पालाय तत्रोद्गमत् ॥५॥

तत्रत्यां घटनां विलोक्य जनता निन्दास्तुती कुर्वते
भस्मस्त्रीधनपुत्रकीर्ति विमलं भालेऽभिशापादभूत् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आदायेति पुरातनी जनश्रुतिरद्यापि तन्त्रायिता
धन्या श्यामथली प्रभुश्च कपिला भक्त्या भजामि सदा ॥७॥

कौशी निर्झरिणी लिखूरमतटे श्यामश्रुती (श्रोतस्य) त्याह्वये
रम्याल्लोकरमाद्धिरम्यरमणात्कल्लेरि क्षेत्राश्रयात् ।
भक्त्या यत्र जनो गतिं च लभते श्यामाकसेरूजले (श्यामायमाने वने)
भूयान्नो शुभदो भवः प्रतिपलं साम्बः शिवः मुक्तिदः ॥८॥

गिरीश गौरीश कलावतीश भूतेशखण्डिततनूद्धृतविग्रहेश
गोवंश बृद्धिकरयोगधरेश शम्भो लिखूदधीश शिवलेतिजनाः स्तुवन्तु ।
श्यामाश्रुतावभिमुखाः सततं स्नपन्ति
लीलायनः कुरूमतिन्त्विवति ज्ञानतीर्थे ॥९॥

<u>अन्यच्च</u> =

विद्येश्वर जनानन्द कन्दवाटी वटाश्रय ।
गंगावारि प्रियाराम धाम वत्सहरेश्वर ॥९॥

तीर्थेश प्रहराधीश मुक्तिनाथ बनाश्रय
भजामो मिलिता नित्यं विद्यातीर्थ नमोस्तु ते ॥१०॥

(लिखू)	(रातमाटे)
लीनं खनाल्लिखूक्ता हि	तटात्तीरं तु रन्तटे ।
रक्तत्वान्मृत्तिकास्थल्या	रामत्वाद्रामरन्तटम् ॥११॥

<u>पयस्वती</u> =

पयोधानान्नदीदक्षे पचल्यस्ति पयस्वती ।

<u>सरस्वती</u> =

नीचैः शम्भोर्जलं प्रत्यक् सरणाच्च सरस्वती ॥१२॥

<u>जल्किनी र बाछामरूवा</u> =

दक्षिणस्यां जलौक्यापरूत्तरे वत्सहं वनम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्यामश्रुती =
शिवधारावहाच्छचामस्रोतसस्त्वादिसंगमम् ॥१३॥

तीर्थं व्रह्मसर: साक्षादादि गङ्गा समागंमात् ।
व्रह्मनद्यां हैमवत्यां व्रह्मज्ञा व्रह्मग्रामत: ॥१४॥

व्राह्मणा व्रंह्मचिन्तायां निरता गुरव: पुरा ।
शिवसान्निध्यलाभत्वादासन्सन्त्वधुना तथा ॥१५॥

व्राह्मणा यानि भाषन्ते मन्यन्ते तानि देवता: ।
रम्याद्रम्यस्थलं धाम श्यामतीर्थं पुराणवत् ॥१६॥

शिवसंगतिलोकत्वाच्छैवो वा तारकान्तर: ।
ग्रामो वाक्पूलितीरम्यान्निरूक्ताद्धिजनश्रुते: ॥१७॥

प्रत्यग्याम्योन्नता भूमि तटिनीतिरतप्रभो ।
मुक्तिकामेन सेवेऽत्य साम्व प्रेरय पश्यकम् ॥१८॥

इमानि स्तुतिपद्यानि प्रत्यहं य: पठेन्नर: ।
शिवलेशप्रसादेन लभेत चिन्तितं फलम् ॥१९॥

फलस्तुति:

माया मोहमयै: पाशैर्यन्त्रिताक्लेशभीरव: ।
पूजनाय द्रुतं यान्तु श्री तीर्थेश्वर सन्निधौ ॥२०॥

हव्यान्नेन सदा पूज्य: फलपुष्पादिभिस्तथा ।
शुद्धभावो नरश्चेद्वा पत्रशाकादिकैरपि ॥२१॥

शिवलेतीशमर्यादा तीर्थादरविवृद्धये ।
जनभक्तिसमृद्धाय स्वयं लयगमाय च ॥२२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्तवोरूपमिदं पुण्यं याथातथ्येन संयुतम् ।
श्यामलक्षस्तुतिः स्यूता नो मम स्तुति श्री प्रभो ॥२३॥

देश काल र पात्रको उद्देश्य :-

व्योमकूटाञ्चलस्थेन संरक्ष्यै हिन्दुसंस्कृतेः ।
श्यामशर्माभिधेयेन विदुषा भक्तिभावतः ॥२४॥

वीरेन्द्रे शासिते राज्ञि विभवेद्वे स्तुतिस्त्वियम् ।
हिन्दुत्व संस्कृतिः पुष्यादितीच्छञ्श्रद्धया कृता ॥२५॥

प्रगतिशील समयको माग :-

सौरमानाब्द दुइ हजार वत्तिसको मार्ग पूर्णिमा ।
यो देश भरिको राम्रो विश्वोच्च शिर माझमा ॥२६॥

***

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

❋चिन्तारमावनस्थली❋

(जननी जन्मंभूरेषा गुर्वी स्वर्गात्स्मरेत्सदा)

द्वितीयोच्छ्वास:

विनता पार्वती चिन्ता लाटी वाटी वनाम्वरा ।
तिलंकुट्टा रमा भीरी माधुरी प्रहरी शिला ॥१॥

भकारोलूपला भार्या भकारी प्राणभाविनी ।
हंसिनी सिंहिनी सिंही नारा वन्यान्तरा शिवा ॥२॥

सानुगा सुभगा दूती माधुरी प्रहरी थला ।
सा कला पद्मिनी गौरी पन्सा कोविदा श्रिया ॥३॥

धैर्या शालवती श्यामा शूलिका चूलिकाग्नयी ।
वधुटी वनपाला च चुचुला धान्यदा रसा ॥४॥

वटकन्धरता कौशी मेखला तीर्थमालिनी ।
काञ्चनी श्रृंखला ज्वाला मालिनी जनता प्रिया ॥५॥

त्रिसप्त तारका धारा कौशिक्यां ता झरन्ति हि ।
माली करोति यं वालं मालिकश्चेहदर्शक: ॥६॥

या देव्यो जनता दृष्टौ चिन्तारमाकपालिनी ।
ता धैर्या विजया दीप्ति: सम्पत्तिर्मधुभाषिणी ॥७॥

सौभाग्या धनदा सिद्धि वुद्धिदा कीर्तिदा शुभा ।
वाक्सिद्धिर्वलदा लक्ष्मीरेकादश गुणाकरा ॥८॥

तडिद्दु: स्वप्न नाशिन्यायुष्मती चिन्तिता चिता ।
चिन्तायां रमते चित्तं वनमेकान्तराञ्चि (जि) ता ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शालका वनगोवर्द्धनरतारन तापगा ।
सप्तक्या भगिनी हैमा शाण्डिली कौशिकी तटा ॥१०॥

सप्तवाटास्तारवटा त्रिसप्त गुणिता झराः ।
गभीर ग्रामगा गौरी कलातार लिखून्तरा ॥११॥

पचलोन्नतकमा(स्तिस्र) धारा स्तारकेशशिरो जटाः ।
गुणितास्त्रिगुणास्तिस्रो हंसिनी पचली सरी ॥१२॥

सेतुवन्धनसंगम्य कुक्कूद्वे नादिनी चरी ।
चिन्तारमातटा शिष्य स्वयं विद्धि शुभाः कथाः ॥१३॥

ग्रथिता मेखला शैव्याश्चिन्तारमावनस्थली ।
भपंक्तिमालिनी चिन्ता रमतां भरतोपला ॥१४॥

विश्वस्मिन्नवनीरम्या वधूटीमेखलांकिता ।
सत्या हैमवती गंगा भुक्तिमुक्ति प्रदायतः ॥१५॥

नर्याः पारावरे पूर्वे परास्मिन तीर्थपावने ।
वृन्दारमणकेदारे विल्वकोविदकान्तरे ॥१६॥

वेदसंगतिमादाय तीर्थं तीर्थान्तराद्वुधः ।
जननी जन्मभूरेषा गुर्वी स्वर्गात्स्मरेत्सदा ॥१७॥

शब्दार्थतश्च तीर्थोऽस्मिन् येऽर्थास्ते नृन्पुनन्तु नः ।
सुधामकथयाद्वारां कोकिलश्यामशीर्षकः ॥
वनपे वसुधे श्यामे स्तौमिमामचलं कुरु ॥१८॥

नागोदराकृतिस्थूलश्चिन्तारतनगोपले ।
भाकृत्याभाषितत्वाद्धि धान्यागारा भकारि नु ॥१९॥

यस्योदरेन्तरिक्षे च चिह्नितान्यक्षराणि तु ।
पठनेन प्रमाणेन तारमन्त्र समानि च ॥२०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भरकारयितुं योग्यो भकारीभान्तराज्जगुः ।
भेणुर्वा धारणात्पोषात् भजन्ति प्रस्तरे मखैः ॥२१॥

वेदैश्चैव पुराणैश्च ऋषयः पूपुजुः पुरा ।
धेनुः सहस्रदूराच्च पचल्युल्यङ्घ्य दक्षिणे ॥२२॥

चिन्तारमणकेऽरण्ये सिंहादिजन्तु गर्जिते ।
पक्षिणां रसनोच्छिष्टे मधुलिण्नित्यगुञ्जिते ॥२३॥

भकारी प्रस्तरे तस्थौ पचलस्त्रिभ्रराद्भृगोः ।
भीतिरेवाद्भुतं लोकाः पश्यन्ति कानने हि तत् ॥२४॥

वनाद्वनाद्वनान्तराञ्चलाः पवन्ति वायवोऽमलाः ।
फलन्ति ग्राम्यसद्वचो निरन्तरं भजुर्द्विजाः ॥२५॥

परामुखी चितातुरा यदाहुतिञ्च सन्ध्ययो ।
धनञ्जयाभिमानिनी पतिम्वराग्निकोणगाः ॥२६॥

उमेश शूलधारणात जगास्रयाः स्रवन्ति ते ।
रमाग्रजातु खड्गिनी न हन्तु नः शिवाऽवतु ॥२७॥

लिखूतीरश्यामस्थलरतशिवं पूजनपराः ।
नमन्तो संपूज्य प्रतिदिनत्रिसन्ध्यासु निरताः ॥२८॥

गिरीन् दिङ्वा तालं चुचुलव्रजलोलूखलजटान् ।
लभन्ते ते ज्ञानं निखिलसुरसंसेवितवने ॥२९॥

सवैमा ठूलो हो गिनति गरिएका अचलमा ।
क्रमैले हेर्दामा सगरनृपरूपाञ्चल जहाँ ॥३०॥

२०३२ पौपकृष्ण चतुर्दशी (कोटेश्वर)

***

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीः

❋ॐ नमः शिवाय❋

श्रीतारकेश्वरमहादेवं पुरस्कृत्य -

शैलेषु हिमवान् श्रेष्ठ तस्योच्च शिखराञ्चले ।
धातुवन्यौषधीयुक्ते उच्चावचस्थलान्विते ॥१॥

रम्ये जनपदे यस्मिञ्छिलोलूखल नामके ।
शिवदूती तथा ब्रह्म नदी च दुग्धकौशिकी ॥२॥

उच्छलन्त्यश्च याः काश्चित् कलकल्लोलनिर्झराः ।
अग्रण्याश्चापराः सन्ति दर्शनादपि मुक्तिदाः ॥३॥

कौशी निर्झरिणी पूर्वे तारकेशो विराजते ।
त्रिनिर्झरैः सुसौम्यत्वात् त्रिजटी भगवाञ्छिवः ॥४॥

गोसम्वन्ध्याद्यस्य प्राप्ति खलक्षेत्रे तपन्तपः ।
भृगुकूटस्य दक्षाङ्गे यत्रस्थित्वा महर्षयः ॥५॥

ग्राममध्योऽस्ति यो ग्रामो ग्रामनाम इति श्रुतः ।
तदुदक् वसतिर्यस्य ज्ञानदो भगवान् हि सः ॥६॥

अस्ति गौरीवनं यत्र सिंहक्रोडैर्भयङ्करम् ।
अन्यैश्च विविधैर्नाना पक्षिभिर्नित्य कूजितम् ॥७॥

चुल्लीकूटेऽस्ति या देवी वने पुष्करिणी युते ।
प्रकृत्यानिर्मिते स्थाने विद्यते त्रिगुणात्मिका ॥८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तारकेशे न दीव्यन्ति साकं सर्वफलप्रदा ।
अतो गौरीवनं नाम दर्शनात् पुण्यदं शिवम् ॥९॥

यतस्तस्योभयोरम्योर्दक्षिणोत्तरपार्श्वयोः ।
पद्मावतीः शैलवत्यौ भूत्वोद्गमननोद्यते ॥१०॥

निर्झरिण्योस्तयोर्नीचैः सेतुवन्धनसङ्गमम् ।
अस्ति तीर्थे जनाः प्राप्य स्नानदानप्रपूजकाः ॥११॥

भवन्ति पुण्यभाजँस्ते काले पर्वणि पर्वणि ।
सङ्गमान्नातिदूराच्च धारास्तिस्रः क्रमेण याः ॥१२॥

पतन्त्यतटतो यत्र निपानमस्ति प्राणिनाम् ।
वहूनां वनक्षेत्राणां कृत्रिमाँस्सरिताँस्तथा ॥१३॥

भृगुकोणश्च वाक्पू च ग्रामौ स्तः सार्थकौ श्रुतौ ।
त्रयो मातृसमा भूत्वा याति सा कौशिकी लिखूम् ॥१४॥

पद्म्यावत्यास्तटे वामे खलक्षेत्रे जलेस्थितः ।
तारकेशो महादेवोऽभीष्टदो भगवान् हि सः ॥१५॥

यन्मायया विलुप्ता गौच्युतस्तन्या निजोपरि ।
आह्वयन्ती निजं वत्सं जनैः दुग्धेश्वरः स्मृतः ।१६॥

पचं लातीति यो देवः स एव पचलीस्मृतः ।
क्षेत्रयोस्थान भेदेन पूज्यतेऽवर संज्ञया ॥१७॥

तस्यैवोपरियस्तिस्रो धारा प्राकृतिकाश्च्युताः ।
झरप्रवाहमालोक्य लोकः प्रणमतिद्रुतम् ॥१८॥

हव्यान्नेन प्रसन्नो यः पक्वान्नेन विशेषतः ।
तारकेश आशुतोषो भुक्तिमुक्तिप्रदो भृशम् ॥१९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

माया मोहमयैः पाशैः यन्त्रिता क्लेशभीरवः ।
तर्तुकामाः नराः सर्वे घोरसंसार सागरम् ॥२०॥

गन्ध पुष्पादि नैवेद्य पत्रशाकादिभिर्युताः ।
पूजनाय द्रुतं यान्तु तारकेश्वर सन्निधौ ।२१॥

गिरीश गौरीश महेश शम्भो
त्रिनेत्र शूलिन् भगवन् खिलेश
तवास्मि दासे य उमेश नित्यं
तारेश दुग्धेश्वर पाहि पाहि ॥२२॥

इमानि रुद्र नामानि प्रत्यहं यः पठेन्नरः ।
तारकेश प्रसादेन लभेत चिन्तितं फलम् ॥२३॥

शरनेत्राभदस्राब्दे वैक्रमे मासि फाल्गुने ।
शिवरात्रौ सिते पक्षे गौरीशंकर पादयोः ॥२४॥

जनभक्ति समृध्यर्थं याथातथ्येन संयुता ।
संग्रथ्य स्तुतिमालेयं अर्पिता भक्तिभावतः ॥२५॥

घिमिरे पदवीभाजा विप्रेण श्यामशर्मणा ।
भृगुकोणग्रामजेन काश्यपान्वयशालिना ॥२६॥

***

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

❋श्रीगलेश्वरब्रह्मचारीज्यूको कैलाशवासचिन्तनसभा❋

अवधूत गलेशान ब्रह्मचारी दिवङ्गतः ।
प्रत्यक्षाणि चरित्राणि शरीरं घटवत्यजन् ॥१॥

मन्दिराणि यज्ञवृक्षाः पाठशाला गवां वनम् ।
तीर्थरूपाश्रमान् वीक्ष्य त्र्युट्यत्सूत्रमणीनिव ॥२॥

महर्षयो यथाऽरण्ये गह्वरे च सरित्तटे ।
वेदाधार सदाचार ब्रह्मचर्यव्रते स्थिताः ॥३॥

नेपाल देशस्य गृहीतधर्म मूर्तिगलेशो हि महर्षिकल्पः ।
आदाय वेदस्य पथश्चरित्रं तपोषयोज्ञानधृतावतारः ॥४॥

श्रीदेवघट्टे तनुमत्यजत्षड्विंशाधिके चायुषि ब्रह्मरूपाम् ।
बृहत्समस्याकुलतां व्यनक्ति अनार्यवृत्तिश्चलिते तिरोद्धुम् ॥५॥

नेपाल वेद विद्याश्रमः
प्र.अ. श्याम घिमिरे
श्रा.कृ. ३०।०३२।४।२२

❋❋❋

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

✱गोरक्षा माङ्गली यात्रा सम्पन्ना ज्ञानपूर्विका✱

श्रीगोरक्षस्थले धूम्रकूट पं. कूपनिर्झरे ।
सिञ्चनायोजनारब्धा कृषिभूम्युपयोगिनी ॥१॥

तडागबन्धचालार्थं श्रीश्रीपञ्च समागमे ।
कर्तव्या वारुणी पूजा मङ्गलाचारपूर्विका ॥२॥

योजना प्रमुखैरस्मानाहयोपस्थिता निशि ।
रामचन्द्र सुवेदी च गेहेन्द्रो नव न्यौ.कृ.निः ॥३॥

श्री श्यामगुरुभिः सार्द्धं वटमूलस्य चत्वरे ।
भूमौ दलानि विस्तार्य माघरात्रिर्गता कथम् ॥४॥

द्वितीय दिवसे माघगताङ्केकादशे गुरौ ।
सचिवै र्निश्चितं कार्यं समाप्य राजस्वागतम् ॥५॥

श्री राजदम्पतीवीरैश्वर्यौ हि व्योमयानके ।
द्वावुड्डीयागतौश्वेतेऽपरयोनीलयानयोः ॥६॥

सचिवा मन्त्रिणा नीचैः प्रस्थातुमुद्यता यदा ।
आकाशे गुञ्जिता तस्मिन् क्षणे वै ध्वनयोऽभृशम् ॥७॥

जय शब्दा नम शब्दा जनताकर तालिकाः ।
अदृश्यानाभवन्नद्रौ पपुर्दृग्भिः सहस्रशः ॥८॥

शनैर्ग्राम्यायाता वयमपि शनैः सत्पथतटे ।
भृशं रात्रिर्वाता वतरसिनजीगन्त्रिमिलिता ।
ततः सर्वे गोर्खा जनपदसिंचाइ जनगृहे
शुभाऽस्माकं यात्रा शयनभ्रमणानन्दफलदा ॥९॥

परावृत्यापण्यां पृथिवि विविधाकौलकुशलाः
गुहामूर्तिर्वाऽपि सुभटगुणितासैन्यविपुला ।
विलोक्यैवं काङ्क्षे पुनरपि करिष्ये शिखरिणीम् ॥१०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

✱२०३२ ने.वे.वि. जन्मोत्सव/जयन्ती✱

" ॐकारः प्रौढमूलः क्रमपदः".............

ऐश्वर्यायाश्चाश्रमस्य द्वितीये वार्षिकोत्सवे ।
द्वाविंशे हि स शिष्यैश्च शुभजन्मोत्सवे दिने ॥१॥

जनश्रेण्यां मिलित्वाऽथ स्वस्ति ब्रूमोनता वयम् ।
वीरैश्वर्य प्रसादोऽयं पातुनो विप्रबालकान् ॥२॥

वर्षे तृतीयेत्वथ

श्रीश्रीपञ्चमहेन्द्ररोपितलतामैश्वर्यजन्मोत्सवे
ऽध्यक्षैर्जूनबुधैः प्रबन्ध कुशलैरारभ्य संवर्धिताम् ।
सिक्त्वाद्वद्वयतस्सुकल्पलतिकां पुष्पाय वा कम्पिताम्
गोष्ठी सं. प्रकरोतु रक्षकसमो वर्षे तृतीयेत्वथ ॥१॥

✱✱✱

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

✱सुरक्ष्या हिन्दुसंस्कृतिः✱

श्रीगोष्ठिसंस्थानसुधारकामान् गुरून्ब्रवीत्येष नमन्समक्षे ।
तत्रैव शिष्यैः सह शिष्यभावो वर्तेत मानं भवति प्रदाय ।
निश्चित्य वक्तुं हि कठोरलोको धन्योऽस्तु ने.वे.वि. च चेत्समर्थः ॥१॥

निवेदकस्य या पीडा प्रधानत्वे दधीचिवत् ।
छेत्तम्मूढमिवास्यैव प्रभुर्धत्ते हसूलिकाम् ॥२॥

त्यक्त्वा संस्कृतिमातरं सरस्वतीं लोकः कलौ दीपिकाम् ।
भाषानां जननी विहाय जनता दुर्भाषया रञ्जिता ।
वीणायां ग्रथिताश्च तारतरला सर्वा हि वाह्युद्गता
नेपाले तु रवीन्दु अङ्कितध्वजा या शोभते शोभते ॥३॥

गुञ्जन्ति भ्रमरा न सन्ति कुसुमान्यत्यन्त विप्राभिधम् ।
शप्त्वा तं शवदाहकार्य कुशलं कुर्याद्द्रुतं कष्टकम् ॥
ने.वे. व्याप्यफलो सदैव मनुते दृश्याश्च ते साक्षिणः ॥
तथ्यानन्यजनान् परीक्ष्य च गु.सं. खिन्नो नरः पृच्छति ॥४॥

संगर शिखररम्या काश्यपी वाऽदितिर्वा
उपदिशति वटुभ्यो देवतस्ते रमन्ते ॥५॥

सूत्रधारो भवेदत्र सगरस्था शुभाशिभिः ।
भवतामेव रक्ष्या हि वीरा नो हिन्दु संस्कृतिः ॥६॥

वेदाश्रमरसप्रज्ञा प्रागुद्यानोन्मुखी च सा ।
परागपोद्यता जाता वासन्तीमधुमक्षिका ॥७॥

✱✱✱

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

✱वर्षे चतुर्थेत्वथ✱

स्व. श्रीपञ्च महेन्द्ररोपितलतामैश्वर्यजन्मोत्सवे
ध्यक्षैर्जूनबुधैः प्रबन्धकुशलैरारक्ष्यसंवर्धिताम् ॥
सिक्त्वा वर्षत्रयात् सुकल्पलतिका पाताय वा कम्पिताम्
गोष्ठीसं. प्रकरोतु रक्षकसमो वर्षे चतुर्थेत्वथ ॥१॥

इममाश्रमस्थायित्वमाने तु द्वितयेब्दके ।
कठोरसेवयाश्वास्य नियुक्ताः सन्ति पण्डिताः ॥२॥

पुरातनी स्थितिर्नास्ति राजधान्यां नु वेदताम् ।
नियमस्यानुसारं हि वेदत्वं परिवर्ध्यताम् ॥३॥

न्यूनाधिकं तयोर्हेतुः कः कस्माब्दे चतुर्थके
कार्य सञ्चालयितृणामाश्रमे परिवर्तनम् ॥४॥

क गं शं नियमं वीक्ष्य वेदप्राधान्यरूपकम् ।
विद्वद्गोष्ठीं समाकर्ष्य योग्यायोग्यं विविच्यताम् ॥५॥

गुरुन्वृत्तिञ्च संवर्ध्य शिष्यस्थायित्वमेव च ।
पारितोषिकदानेन योग्याञ्छिष्यान् प्रतुष्यताम् ॥६॥

सुव्युत्पन्नावीक्ष्य शिष्यान् सुपात्रत्वे नियुज्यताम् ।
छात्रालय प्रवेशाय द्वारमेकं प्रकल्प्यताम् ॥७॥

एषु विकास क्षेत्रेषु चतुर्ष्वपि प्रपूर्यताम् ।
तेभ्यो वानीय क्षेत्रेभ्यो वटून् प्रपूर्य पाठ्यताम् ॥८॥

संभावितेषु रिक्तेषु स्थानेष्वत्र प्रचालिताम् ।
आद्यां परम्पराप्राप्तां गुर्वध्ययनपूर्विकाम् ॥९॥

परिस्कृता सूचीमुखा वेदाश्रमस्य तालिकाम् ।
साङ्गं वापि परां विद्यां वेदवाणिं जुगोप्यताम् ॥१०॥

अस्य ने.वे. व्याश्रमस्य चतुर्थे वार्षिकोत्सवे ।
श्रीमन्नध्यक्षगोष्ठीशं (सं.) पद्याञ्जलिः समर्प्यते ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

✱पञ्चमे वार्षिकोत्सवे✱

यस्या या लेखनी तु जनमनसिरता
ज्ञानज्योतिस्वरूपा ।
प्रत्यक्षा शक्तिरूपा स्थिरमुकुटधरा
षट्त्रिंशे हि प्रविष्टा ॥
विश्वश्येन प्रतिष्ठा जनहित प्रबलोत्कर्ष ।
चित्ता हि यस्या ।
सां जीयान्नित्यस्वस्था नवसुत सहिता
वीर वीरेन्द्रराज्ञी ॥१॥

अस्य ने.वे. व्याश्रमस्य पञ्चमे वार्षिकोत्सवे ।
श्रीमन्नध्यक्षगोष्ठी सं. निवेद्य यच्च प्राथ्र्यते ॥२॥

उद्देश्य पूरणार्थं वै गोष्ठी सं. उद्यतो यतः ।
अत्यन्तावश्यकं न्यूनं श्रुत्वा क्रमशः पूर्यताम् ॥३॥

पाठभोजनसन्ध्यानां भवनानि निरीक्ष्य च ।
च्योतमानानि वृष्टौ तु निर्मितव्यानि सत्वरम् ॥४॥

रक्षार्थं भोज्यपात्राणि वासांसि शयनानि च ।
चौरभीति निषेधाय द्वारमेकं प्रकल्प्यताम् ॥५॥

स्थानेऽत्र दम्भिका धूर्ता सज्जनाश्च समादृता ।
प्रमदा प्रवला स्थाने अजागौचारका जनाः ॥६॥

वटून् प्रधर्श्याश्रमेऽत्र कुर्वन्ति मलिनं सदा ।
पूरीषमपरेषाञ्च खिन्नादृष्टास्थिता वयम् ॥७॥

स्थलं च सार्वजनिकं पूर्वस्यां प्राङ्गणं शुभम् ।
मार्गावपि सुसम्पन्नावन्तद्वारेण रक्ष्यताम् ॥८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चौरेण भोज्यपात्राणि हृतानि पुस्तकानि च ।
स्थानीयपशुभिर्नित्यं वस्त्राणि चर्वितानि च ॥९॥

रोपितेषु च पुष्पेषु वनौषधियुतेषु च ।
अजा गावो चरन्त्यत्र पश्यन्ति सकला जनाः ॥१०॥

स्वस्वकाले च कर्तव्ये यत्कर्मणि सुनिश्चितः ।
मनसा कर्मणा वाचा खिन्नश्च वञ्चिताश्रमः ॥११॥

भुजिष्यपोऽकृते रुष्टस्तुष्ट किं वा विविच्यताम् ।
तावन्यत्र प्रेषितव्यौ कर्तव्यरहितौ यदि ॥१२॥

उपसंहार

सत्रारम्भे हि शिक्षाया सत्रान्ते वा सुनिश्चिते ।
एकस्मिन् दिवसे जन्मोत्सवादै भूभृतान्तु वा ॥१३॥

परीक्ष्य समितिः शिष्यानुद्देश्य पूर्तये द्रुतम् ।
कुर्याच्च शिशवः स्थूला यादृशा नाधुनाकृता ॥१४॥

शास्त्रोक्तदिनकृत्येषु सदाचार ब्रतादिषु ।
जपपाठ प्रवृत्तेषु श्रद्धा भक्तिजनेषु च ॥१५॥

कस्मिन् निमन्त्रणे प्राप्ते गत्वा लक्ष्ययुतं भवेत् ।
वैषम्यव्यवहारेषु केष्वहाव निषेधनम् ॥१६॥

प्राचीन परिपाट्यां हि नाश्रमेऽध्ययनं सदा ।
सार्वजनिकविश्रामे ऽनद्यायाश्य प्रकाश्यताम् ॥१७॥

अस्य ने.वे. व्याश्रमस्य पञ्चमे वार्षिकोत्सवे ।
श्रीमन्नध्यक्ष गोष्ठीसं. प्रार्थनैव विधीयते ॥१८॥

व्योमकूटाञ्चलस्थेन प्राध्यापकपदेन वै ।
श्यामशर्मकृतेऽयं च पञ्चमे वार्षिकोत्सवे ॥१९॥

***

वि.सं. २०३५

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

✱षष्ठवर्षे प्रविष्टा✱

नेपालस्य प्रतिष्ठा प्रतिदिनविकसा
ध्यात्मचिन्ता प्ररूढा ।
गोशालाद्यष्टशाला सहित जनहितो
द्यानवृक्षौषधिष्ठा ॥
कैलाशस्यैव क्रोडे पशुपतिशरण
वाग्मती तीरलग्ना ।
दृष्टैषाया श्रुतिपदविहिता षष्ठ
वर्षे प्रविष्टा ॥१॥

(२०३६)

✱✱✱

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

✱सप्तमे वार्षिकोत्सवे ✱

माल्यार्पणम् -

नेपालस्य प्रतिष्ठा बहुमतमिलिता
शासिता या व्यवस्था ।
वर्षेऽस्मिन् राजनीतौ जनमतगणिता
सैव पञ्चायती या ।
दीपावल्यां प्रसस्तां मधुरफलयुतां मालिकां चार्पयामः
ऐश्वर्या राज्यलक्ष्मीर्यशसि सुविपुला
वीरवीरेन्द्रराज्ञी ॥१॥

शुभकामना -

हिन्दूराज्ये श्रौतस्मार्तादिकज्ञानार्थं या वेदवेदाङ्गपूर्णा ।
आर्यावर्ते प्राच्यरीतिः प्रशस्ता जागर्त्वेषा विप्रबालेषु सुप्ता ॥२॥

कृत्यैर्नित्यं सच्चरित्रैर्यथार्थतोकाः सार्थां पाठशालां ब्रुवन्तु ।
इत्याशासेऽध्यापकः सप्तमेब्दे द्वात्रिंशेब्दे राज्ञि जन्मोत्सवे हि ॥३॥

(२०३७)

✱✱✱

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

✱ अष्टमे वार्षिकोत्सवे ✱

बहुमत विवांदान्निर्गताष्षष्ठवर्षे
तदनु च वहवोऽन्ये षोडशैवाऽपि पूर्णाः ।
नियमपठनमध्ये द्वौ गुरु वर्धितौ च
समितिरपि बलिष्ठा राजमानैश्च पूज्या ॥१॥

मान्याः स्सभ्याः प्रचलितदिनात्सप्तमाद्वा व्यतीता
ज्ञेयं रूपं प्रचलितदृशा वेदविद्याश्रमस्य ।
पूर्वं राजा सुविदितयशा पञ्चश्रीश्रीमहेन्द्रः
प्रारभ्यास्यश्रमधनव्ययाद्राष्टशोभास्ति धन्या ॥२॥

गतेभ्यः सप्तवर्षेभ्यः प्रारभ्यात्रैव चालिता ।
रक्षिता वैदिकी संस्था तपस्या त्यागपूर्विका ॥३॥

लौकिकैर्नास्तिकै धूर्तैः कृत्वैवन्नु विनङ्क्ष्यति ।
द्रव्याणामुपयोगार्थं विद्वांशोऽपि च दुर्लभाः ॥४॥

गोष्ठी लक्ष्यं गणयति प्रत्यब्दं गणनदृशा ।
प्रशंसन्ति जनाः केचिद् विनिन्दन्त्यपरे जनाः ॥५॥

प्रयाशो गलितः सर्वो योजकश्चाऽत्र दुर्लभः ।
शताब्देषु व्यतीतेषु नाभवत्सुदृढा स्थितिः ॥६॥

अनेकैः संघसंस्थाभिरभितः क्रान्त आश्रमः ।
स्वतन्त्रा वैदिकी संस्था रक्षिष्यति यथा ब्रुमः ॥७॥

सनातनालयं तस्मात् कक्षादन्यत्र सार्यताम् ।
सुरक्ष्यं तञ्च वेदार्थं सङ्गीतं यन्न युज्यते ॥८॥

प्राकारं सुदृढं कृत्वोतरस्यामेक एव हि ।
भवनतृतये मध्ये छात्रावासमुखे हि या ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रवेशदर्शिका पाटी निखातव्या यथा दृढा ।
बाह्यव्यक्तिनिषेधाय पाठ-द्रव्य हिताय च ॥१०॥

अनया परिपाट्या तु खेलनाय स्थलं शुभम् ।
पूर्वस्यां प्राङ्गणं रम्यं पाठवोधाय श्रृङ्खला ॥११॥

प्रशासनालयश्चापि सुरक्षोपस्थितिर्यतः ।
कर्तव्या विदुषां साध्यवस्तूनामास्ति रक्षणम् ॥१३॥

परीक्षितानि पत्राणि भविष्ये दर्शनाय च ।
मञ्जूषा स्थापनीयाऽत्र संस्कृतज्ञश्च पण्डितः ॥१३॥

प्रारब्धान्यस्य वर्षाणि अवशिष्टानि त्रीणि वै ।
गुरुकूलस्योचितानि इतिहासो वदिष्यति ॥१४॥

समित्यामस्येव व्यथितहृदयोऽभ्येत्य पुरतः
सभाभ्यः सप्तभ्यः श्रुतिविटपसेवामकरवम् ।
विभिन्नो यो रत्नो गुरुवरसमक्षेर्पितरतः
मतेनैकं भाव्यं नियमचलने का अनुमतिः ॥१५॥

अस्य ने.वे. व्याश्रमस्य प्राध्यापकपदेन वै ।
कृतेऽयं प्रार्थनाचैवमष्टमे वार्षिकोत्सवे ॥१६॥

(२०३८

***

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

✱नवमे वार्षिकोत्सवे✱

माल्यार्पणम् -

नेपालस्य प्रतिष्ठा प्रतिदिनविकसाध्यात्म
चिन्ताप्ररूढा ।
गोशालाद्यष्टशालासहितजनहितोद्यान
वृक्षौषधिष्ठा ॥
कैलाशस्यैव क्रोडे पशुपतिशरणा
वाग्मती तीररम्या ।
द्रष्टुं यामो नवम शरदि
स्वीकृता पाठशाला ॥१॥

[विंशोत्तरैकत्रिंशाब्दे द्वाविंशे सौरकार्तिके ।
राज्ञा ऐश्वर्यदेव्यास्तु जन्मोत्सव शुभे दिने ॥१॥
पात्रभोजनवासोभिर्गुरुस्थानव्यवस्थया
श्रीराजगुरुमुख्यो हि प्रारभदाश्रयं क्रमात् ॥२॥]

वेदानुकूलधर्मस्य रक्षार्थञ्च महर्षयः ।
मर्यादा पालका भूपाः श्रुतिनीति अपीपठन् ॥२॥

वेदपठनसम्पन्नान् सदाचारस्य पालकान्
समुत्पादयितुं शिष्यान् देशरक्षार्थमेव च ॥३॥

विप्रक्षत्रियविट्छूद्राज्जातिधर्मानुसारतः ।
यस्मात् वै रक्षितो देशो नेपालो वैदिको यतः ॥४॥

एवं परम्परा प्राप्तां कल्पज्ञानाय निर्मिताम् ।
शास्त्रीय मूर्तिसंयुक्तां पाठशालां विविच्यताम् ।५॥

जातीय गौरवार्थं हि महेन्द्रोऽरचयन्नृपः ।
अयोग्यः पुरुषो नास्ति योजकश्चात्र दुर्लभः ॥६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रारब्धान्यस्य वर्षाणि व्यतीतान्यष्ट वै यथा ।
सुप्तजागृत न्यायेन वच्म्यतोब्दे नवेऽब्दतः ॥७॥

चर्चाया चर्चिता चास्य वेदाश्रमस्य श्रूयताम् ।
नवमेब्देऽपि संस्मृत्य धैर्यमास्थाय वर्ण्यते ॥८॥

वेदोद्देश्य प्रचारस्य स्थलं धर्म्यं च प्राङ्गणम् ।
मूर्तिकलादि युक्तानि भवनानीक्ष्य यान्तिके ॥९॥

खेलनाय सुरम्यत्वात् श्रवणाय सुभाषितात् ।
पठनाय व्यवस्थित्वात् स्वच्छतायां न यान्तिके ॥१०॥

स्वतन्त्रत्वात् सुरम्यत्वात् के न यान्ति वियोगिनः ।
श्रृङ्गार प्रमुखानार्यो कामे संयोगका न काः ॥११॥

मेलका रोचका यत्र समये चलिता पुरा ।
एकान्ते वा समाजे वा केनेच्छन्ति सदैव हि ॥१२॥

समस्त लोकमेलैर्वा धर्मव्याजोपदेशिभिः ।
विश्वहिन्दुसमायोगे के के सन्ति न बाधकाः ॥१३॥

अनेकपर्वव्याजेन वनभोजनवाञ्छया ।
गोचारण निमित्तेन वाजामेषादिपालिभिः ॥१४॥

पाठ्यकक्षा प्राङ्गणं वा शौचालयजलाशयौ ।
वेदाश्रमो नाममात्रं सर्वमाक्रान्तमेव हि ॥१५॥

श्रीपञ्चसर्वकारस्यादेशाद्वै विनियोजिता ।
संप्राप्ते नवमे वर्षे निर्माणसमितेः पुनः ॥१६॥

क्षेत्रसुधारनाम्ना तु नियुक्ता शतशो जनाः ।
तथ्यं निरीक्षकाः सन्ति केचिच्च मूर्तिकारकाः ॥१७॥

इतरेतक्षकादारू पाषाणभित्तिकारकाः ।
अपरे लेखकाकार्यकर्तृत्वै तु विभेदकाः ॥१८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आदेशिनश्च द्रव्याणां गणयित्वा विवेचकाः ।
शिल्पिनाश्चित्रिणोऽनेके संभारयोजकास्तथा ॥१९॥

स्त्रियो वा पुरुषाश्चाऽत्र वेदाश्रमस्य सर्वतः ।
मेलास्वरूपसंघट्टात् विक्रेतारोऽपि सन्ति च ॥२०॥

लोके वेदे समानत्वात् वेदकक्षा विभिद्यताम् ।
वेदाश्रमस्तु भवनैस्सत्यमत्र व्रुवन्ति हि ॥२१॥

आन्तरिक सुधारार्थं गम्यतेतोऽपि सूच्यते ।
यतो हि शिखराद् द्रष्टुं नगरात् पूर्वजा गताः ॥२२॥

निन्दन्ति केचिद् घटनाऽपि सत्या
केचित् स्तुवन्ति भवितव्यमेवम् ।
दुष्कृत्यमेतत् क्षमया जयेम
बालस्वभावादपमानिताः के ॥२३॥

यूनः समाजाच्च विवेकहीनात्
प्रलुब्धमुख्य जनकार्य योगात् ।
प्रभावितोऽभूद्वटुमण्डलीमुहुर् ।
धिक्कृत्य सत्यान् गुरुकूलकृत्यान् ॥२४॥

यौवनं धन सम्पत्तिः प्रभुत्वमविवेकिता ।
चत्वारो हि गते वर्षे के केऽनर्थाः ब्रुवन्तु ते ॥२५॥

दशदोषान्प्रदर्श्याथ गुणाँश्च घटितान् यथा ।
गुरुकूलस्वरूपेण वर्षेऽस्मिन् मान्यतामगात् ॥ २६॥

जन्मोत्सवे हि ऐश्वर्याश्चतुस्त्रिंशत्तमेऽब्दके ।
नवमेवार्षिकेऽतीर्त्य वेदाश्रमोऽभिर्वद्धताम् ॥
वेदाश्रमं समुद्धर्तुं यततेऽस्याऽस्य शिक्षकः ॥२७॥

(२०३९)

***

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वकीय वंशवर्णनम्

श्रीरत्नेश्वरपूर्वजो हि घिमिरेत्याख्ये भवत् काश्यपे
गोत्रे वै पठनाय पितृभवनान्निष्क्रम्य त्यक्त्वा बटुः ।
देशान् स विविधान् अतीत्य नगरीं पद्भ्यां हि काशीमगात् ।
गौरीनाथ गुरोः शिसेव सततं साऽऽग्र्नेनवाद्वा व्रती ॥१॥

विधीन् यान् कठिनान् श्रुतौ व्यवहृतान् शास्त्रार्थवादे जयत्
ज्ञात्वा ऋग्यजुषां रहस्य प्रमुखान् तुष्टो गुरावादिशत् ।
गच्छ त्वं प्रतनोतु वंशविपुलो धन्योऽस्तु गेहाश्रमः
इत्याज्ञां शिरसाभिवन्द्यकुशलो विस्मृत्य जन्मस्थलम् ॥२॥

नेपालस्य हि व्योमकूटनिकटे याज्यं च ब्रह्मस्थलम् ।
दृष्ट्वा संगतिलब्धये तिथिप्रिये लेतीति ग्रामे श्रुते ।
कौशी निर्झरिणी लिखू नदतटे श्रीवैक्रमाब्दे शुभे
द्वङ्गाष्टैकमिते रवौ मकरगे तस्थौ गुरुक्तीं स्मरन् ॥३॥

ग्रामस्था हि पुरातनाश्च कुलिना आचार निष्ठा द्विजा
स्वस्वधर्म प्रवर्तिता जनपदे ये ग्राममुख्या नराः ।
दृष्ट्वा पूजनयाग-पाठवचनामृतैश्च तुष्टा जगुः
आहो ! भाग्य ? किमस्य मानसपटे दास्याम कन्यां किमु ? ॥४॥

रत्नेश्वराभिधं विप्रं युवानं स्नातकं वरम् ।
विद्वासं च सदाचारा निष्ठं तं ब्रह्मचारिणम् ॥५॥

दातुं गौतमसंवादे कोप्येकादुद्यतो भवेत् ।
अहं पूर्वमितिस्मृत्वा छलेन लाटिकामदात् ॥६॥

लाटिकासूत त्रीन् पुत्रान् ज्येष्ठ मध्यकनिष्ठकान् ।
श्री हर्षं गौरीकान्तं च सदानन्दं तृतीयकम् ॥७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एव च वंश विस्तारे लोक सत्कार सद्मनि ।
लेती वाक्पूभयोर्यत्र वाक्पूशुल्कप्रदा नृपे ॥८॥

लेती विप्रवृ (भृ)ता राज्ञो निःशुल्का गौतमवृता ।
मुख्याकर ग्रहीतारः रत्नेश्वर पुरोहितः ॥९॥

तारकेश्वर संवादात् ज्ञेयां भुवि शताधिकाः ।
गोष्ठे गावरभूवन्ताश्चारणे कलहोप्यभूत् ॥१०॥

सशुल्का झागरावाटी सा वाटी गौतमवृत्ता ।
इत्येवमुभयोर्युद्धं पक्षयोश्चलितेऽजयन् ॥११॥

वृता पराजिता विप्रा खिन्नास्तुष्टाः करग्रहाः ।
सूनुदारा अभूवन् ते मुख्याग्रामे सुखाधिकाः ॥१२॥

तत्रावस्थानुसारेण पुरातन पराधिना ।
चितारूढा शपद्यत्रा सत्यं व्यवहृतं भुवि ॥१३॥

यः कोऽपिं निवसेत्तत्र वंशस्तस्य प्रणश्यतु ।
शापाद् प्रभृति शंकन्ते गेहाय "झगरा" स्थले ॥१४॥

सदानन्दात्कनिष्ठाद्धि विश्वेश्वर वीरेश्वरौ ।
द्वावभूतां तयोर्ज्येष्ठा चत्वारः सूनवोऽभवन् ॥१५॥

श्रीलालो भालुकंश्चापि जगन्नाथश्च केशवम् ।
एष्वेव जायतां पुत्रौ जगन्नाथाच्च सुन्दरौ ॥१६॥

भक्तिर्विलाशः प्रथमो कनीयाँश्च सुदर्शनः ।
उभयोरेक एवासीत् आनन्दपुर साधकः ॥१७॥

(२०३२)

***

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेपाली खण्ड

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

✱मङ्गलाचरण✱

वेद पढे जो छोरा मेरा शास्त्र पढे ती नाती ।
पुर्खा खोज्ने वावू मेरा पुख्र्यौली कै हौं साथी ॥१॥

शिरविन्दु परी इन्दू सेता छन् झलमल्ल ती ।
गाइगोडे कुटिलो लामो सूँढोमा अलमल्ल यी ॥२॥

अन्मनी गतिलो तान हेर्दै जानु छ मोदक
करमा सवका साक्षी देव छन् मन शोधक ॥३॥

आधा मात्र छ मुस्कान सेतो दन्त सधैं भरी ।
एउटै त्यो दुन्दुभी पेट दूर्वाको लिई मञ्जरी ॥४॥

उठाई खँदिलो पार्न ऋद्धि सिद्धि दुवैतिर
लिई चामर सेवामा भए झैं म अघिल्तिर ॥५।

हेर्दछू प्रभुको गाथ नागसूत्र वने छ र ।
वखान गुणको गर्दै नाम लिन्छु मन स्थिर ॥६॥

मुहूर्त माङ्गली शोभा सिद्धिदाता प्रभू अव ।
मूसो वाहन हात्तीको कान छामे प्रणाम छ ॥७॥

(चञ्चला)

सत्यको खोजीमा लुक्ने छरीति हँसिली पनि ।
गतिला पतिकी प्यारी आउ वेश्या भयौ तिमी ॥८॥

दुनियाँ राखि संसार रमा उ मालती तिमी ।
गतिला ध्यानमा एक्ली भजौं नामाक्षरी गुणी ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वनमा नयना भङ्गी मनमा तनकी तिनी ।
लयमा लय संसार माया हे रमणी मणी
चोर्नीको मनमा के त्यो ? भन्दछन् नारते इनि ॥१०॥

(भूमिंका)

विश्वको भित्र नेपाल देशका नीति पालक ।
पृथ्वी नारायण वुद्ध जनकादिक छन् सब ॥११॥

याज्ञवल्क्य भृगु व्यास मनु राम पराशर ।
नेपाली शैलिमा मिल्ने विश्वामित्र हिमालय ॥१२॥

यसैमा गण्डकी कोशी मेची काली र वाङ्मती ।
पिण्डेश्वर मुक्तिनाथ मुख्य पशुपतीश्वर ॥१३॥

दुर्गा गार्गी राज्यवती नारी काली सुरप्रिया ।
हुँदा पवित्र नेपाल सीताजी जन्मने स्थिरा ॥१४॥

नेपाली तीर्थ भै फेरी हिन्दुस्थान नुहीरछ ।
मान्दछन् पूर्ण दृष्टान्त नेपाल सबको प्रिय ॥१५॥

वास्तविक तथ्यको खानी सवैको दृष्टि उन्नत ।
हुने गौरवले पूर्णच्छत्र मुकुट पूज्य छ ॥१६॥

जन्मेर गाउँमा खेल्यौ फर्कौं गाउँ भजीरहूँ ।
मर्यादा श्रुतिमा हेर्दै नेपाली लेख्दछू म हूँ ॥१७॥

***

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्री :

जन्मस्थल वर्णन

(प्रथम पटल)

श्री गणेश प्रभू सारा दिउन् सिद्धि भने जति ।
लाटिका वाटिका गाउँले जनता खुशि छन् उती ॥१॥

रहने भृगुका काख कौशिकी छन् लिखू भनी ।
के भनौं छन् सबै जान्ने पुगेर तीर्थमा घुमी ॥२॥

जाउन् दर्शनका लागि कुन् लाटि वाटिको थलो ।
नभए मनमा शान्ति सम्पूर्ण जनको भलो ॥३॥

सुवर्णा ताम्रदा पारी वारी छन् गौरि-शंकर ।
विश्वास छ भने सारा गोरक्षदेशको घर ॥४॥

आदि गंगा चुली माझ छहरा अधिकै भिर ।
आमाको वारिको माथी शैल आकाश भङ्गुर ॥५॥

खगोल जान्नका लागि नानी सगर चढ्दछ ।
भूगोल जान्न नेपाली समुद्र पनि तर्दछ ॥६॥

नदीका वेगसंगै पल्ला वल्ला संगमका फल ।
सगर परि चिनेको छ चिनेको आफ्नो नै छ त ॥७॥

स्वर्गीय पुष्पवाटीका दर्शनले मुग्ध छन् तव ।
देवतात्मा हिमालीका माली झैं मान्दछन् तव ॥८॥

भरतले पालना गर्छन् आज्ञा श्री प्रभु(का) खातिर ।
मर्यादा त्यही छ देशी थामन स्वर्गका वर ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रिकोण कोणको विन्दु भृगुकोण बराबर ।
पर्कटी कतिका पुस्ता जान्दछौ भन घर्थल ॥१०॥

गोठालो गाइको वन्न लेटिकी लाटिको कर ।
व्यापक गुरुको स्थान पचलेश्वरको घर ॥११॥

गर लाग्छ भने आमाको छोरो प्रिय बन्छ र ?
ईशारा गर्दछन् हाम्रा गुरु नै लोक जान्दछ ॥१२॥

माथिको वाक्य जानेर कुरो तल्तिर वग्दछ ।
उसैमा नवगे फेरी विर्झेर पनि घोच्तछ ॥१३॥

तसर्थ लेखनी सोझी लाटिकी परिचारिका ।
हुनाले जान्दछिन् जिव्रे बुझ वात पछाडिका ॥१४॥

